अध्यर्धपूर्वद्विगोर्लुगसञ्ज्ञायाम् । (२८/१६९३)

आर्हात् इत्येव । अध्यर्धशब्दः पूर्वो यस्मिन् तस्माद् अध्यर्धपूर्वात् प्रातिपदिकाद् द्विगोश्च परस्य [1]आर्हीयस्य लुग् भवति असञ्ज्ञायां विषये । अध्यर्धकंसम् । द्विकंसम् । त्रिकंसम् । अध्यर्धशूर्पम् । द्विशूर्पम् । त्रिशूर्पम् । असञ्ज्ञायाम् इति किम् ? [2]पाञ्चलोहितिकम् । पाञ्चकलापिकम् । लोहिनीशब्दस्य [3]भस्याढे तद्धिते (६.३.३५/८३६ वा.) इति पुंवद्भावः । [4]प्रत्ययान्तस्य विशेषणमसञ्ज्ञाग्रहणं न चेत् [5]प्रत्ययान्तं सञ्ज्ञा इति । अध्यर्धशब्दः [6]सङ्ख्यैव, [7]किमर्थं भेदेनोपादीयते ? ज्ञापकार्थं, क्वचिदस्य सङ्ख्याकार्यं न भवति,[8] [9]'सङ्ख्यायाः क्रियाभ्यावृत्तिगणने [10]कृत्वसुच्' (५.४.१७/२०८५) इति ॥

विभाषा कार्षापणसहस्राभ्याम् । (२९/१६९४)

अध्यर्धपूर्वाद् द्विगोश्च कार्षापणसहस्रान्तात् [11]उत्तरस्यार्हीयप्रत्ययस्य विभाषा लुग् [12]भवति । पूर्वेण [13]लुकि नित्य प्राप्ते [14]विकल्प्यते । अध्यर्धकार्षापणम्, अध्यर्धकार्षापणिकम् । द्विकार्षापणम्, द्विकार्षापणिकम् । औपसङ्ख्यानिकस्य टिठनो [15]लुक् । [16]अलुक्पक्षे च प्रतिरादेशो विकल्पितः[17] । अध्यर्धप्रतिकम् । द्विप्रतिकम् । त्रिप्रतिकम् । सहस्रात् – अध्यर्धसहस्रम्, अध्यर्धसाहस्रम् । द्विसहस्रम्, द्विसाहस्रम्[18] । [19]अलुक्पक्षे सङ्ख्यायाः संवत्सरसङ्ख्यस्य च इत्युत्तरपदवृद्धिः ।

[५०५] सुवर्णशतमानयोरुपसङ्ख्यानम् । (म.भा. २.३४९)

अध्यर्धसुवर्णम्, अध्यर्धसौवर्णिकम् । द्विसुवर्णम्, द्विसौवर्णिकम् । अध्यर्धशतमानम्, [20]अध्यर्धशातमानम् । द्विशतमानम्, द्विशातमानम् । [21]परिमाणान्तस्य (७.३.१७/१६८३) इत्युत्तरपदवृद्धिः ॥

द्वित्रिपूर्वान्निष्कात् । (३०/१६९५)

[22]द्विगोः इत्येव । द्वित्रिपूर्वाद् द्विगोर्निष्कान्तात् [23]आर्हीयप्रत्ययस्य विभाषा लुग् भवति । द्विनिष्कम्, द्विनैष्किकम् । [24]त्रिनिष्कम्, त्रिनैष्किकम् ।

[५०६] बहुपूर्वाच्चेति[25] वक्तव्यम् ।

बहुनिष्कम्, बहुनैष्किकम् । परिमाणान्तस्य[26] (७.३.१७/१६८३) इत्युत्तरपदवृद्धिः ॥

बिस्ताच्च । (३१/१६९६)

द्वित्रिपूर्वात् इति चकारेणानुकृष्यते । द्वित्रिपूर्वाद् [27]बिस्तान्ताद् द्विगोः परस्यार्हीयप्रत्ययस्य विभाषा लुग् भवति । द्विबिस्तम्, द्विबैस्तिकम् । त्रिबिस्तम्, त्रिबैस्तिकम् । [28]बहुविस्तम्, बहुबैस्तिकम्[29] ॥

---

1. आर्हीयप्रत्ययस्य ब.क.ड.फ.ग.ह. 2. पाञ्चलौहितिकम् ह. 3. भस्याढे इति नास्ति फ. 4. प्रत्ययान्तविशेषणम् क. ब. 5. प्रत्ययान्तेन संज्ञा गम्यते क, प्रत्ययान्तसंज्ञा ह. 6. संख्या इति ह, शब्दोऽपि ड. 7. स इत्यधिकम् क.ह. 8. इति इत्यधिकम् फ.ह. 9. संख्या इति ह. 10. कृत्वसुच् नास्ति ब.क. 11. परस्य क.फ. 12. विधीयते फ. 13. लुकि नास्ति फ. ह. 14. विकल्पो भवति फ, विभाषा लुग् विकल्प्यते ह. 15. लुक् नास्ति फ. 16. पक्षे ह, पक्षे तु क. 17. भवति इत्यधिकम् फ, विभाषितः ह. 18. त्रिसहस्रम् त्रिसाहस्रम् इत्यधिकम् क.ड. 19. अलुक्पक्षे नास्ति क. 20. नास्ति फ. 21. वाक्यमिदं नास्ति ब. क. ड. 22. वाक्यमिदं नास्ति ब.क.फ. 23. आर्हीयेष्वर्थेषु विहितस्य क. 24. त्रिनिष्कम् नास्ति ह. 25. च नास्ति क. 26. संज्ञावचनयोः इत्यधिकम् ड. 27. बिस्तान्तात् नास्ति फ,°पूर्वान्तात् द्विगोः क. 28. बहुपूर्वाच्च इति वक्तव्यम् इत्यधिकम् ब.क.ड. 29. योगविभागः उत्तरार्थः इत्यधिकम् ब.